National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(53): 231-233
© 2024 NJHSR
www.sanskritarticle.com

**विशाल शर्मा**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
वेदव्यासपरिसरः, बलाहरः

**Correspondence:**
**विशाल शर्मा**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
वेदव्यासपरिसरः, बलाहरः

# वाक्यपदीयानुसारं आगमस्य प्रामाण्यविचारः

**विशाल शर्मा**

**शोधसारः**

वाक्यपदीयमिति ग्रन्थः दार्शनिकग्रन्थः वर्तते। भर्तृहरिणा अत्र स्वविचाराः दार्शनिकदृष्ट्या प्रतिपादिताः वर्तन्ते। अस्मिन् शोधपत्रे आगमप्रामाण्यस्य विचारः क्रियते। आगमस्य प्रामाण्यम, अनुमानस्य निरसनञ्च च कथमिति। धर्मप्रधानदेशोऽयमस्माकम् धर्माधर्मविषयोऽयं न प्रत्यक्षेण, नानुमानेन, न चोपमानेन अनुभवितुं शक्यते। केवलम् आगमप्रमाणेन तस्य विषये परिज्ञानं सम्भवति। इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् । इन्द्रियमाध्यमेन बाह्या विषया मध्यमपरिमाणसम्पन्नाः प्रत्यक्षीक्रियन्ते। अणुपरिमाणशालिनः, विभुपरिमाणशालिनस्तु प्रत्यक्षस्यागोचरीभूताः। तेषामनुभवे आगमप्रमाणम् एवोपादेयम् । विभु शब्दब्रह्म आगमप्रमाणेनैव ज्ञातुं शक्यते। अत एव आगमप्रमाणस्य परं प्रामाण्यं च व्यवस्थापयति वाक्यपदीयकारः। अत्र भवान् त्रिंशततमां कारिकामारभ्य त्रिचत्वारिंशत्तमां कारिकां यावत् पठिष्यति । तत्र व्याकरणे आगमस्य अभ्यासस्य अदृष्टस्य चापि प्रामाण्यं स्वीकृतमस्ति इत्यपि निरूप्यते।

**कूटशब्दाः**
प्रमाणम्, धर्मः, अधर्मः, आगमः, इन्द्रियम्, ज्ञानम्।

**प्रस्तावना**

आगमः अर्थात् शास्त्रं वेदादिकम्। आगमस्य प्रामाण्यम्, आगमप्रामाण्यम्। मानाधीनाः मेयसिद्धिः भवति। अतः स्वशास्त्रसिद्धान्तसाधनाय प्रमाणम् अवश्यं स्वीकरणीयमिति हेतोः यथा नैयायिकादयः प्रत्यक्षानुमानादिकं प्रमाणं साधयन्ति, तथैव वैयाकरणैरपि प्रमाणानि स्वीकराणीयानि। अत्र शास्त्रे आगमस्यापि प्रामाण्यं स्वीकृतमस्ति, यतोहि धर्माधर्मविषये प्रत्यक्षादिकं प्रमाणं भवितुं नार्हति। सामान्यतया भवान् जानाति यत् प्राणिनाम् अस्थीनि अपवित्राणि भवन्ति । किन्तु शङ्खस्य अस्थि पवित्रं भवति। तत् प्रक्षालनमात्रेण शुद्धं भवति। सर्व पत्रं पुष्पं वा यथोत्पन्नं तथैव देवेभ्यः समर्पणीयम्, किन्तु विल्पपत्रम् अधोमुखं समर्पणीयम्। अत्र शास्त्रादृते अन्यत् प्रमाणं न सम्भवति। तथैव गृहे दानं भवति तदा एकगुणं फलं मिलति। तीर्थे दाने कृते द्विगुणं फलम्। ग्रहणकाले तीर्थे दाने कृते ततोप्यधिकं फलमित्यत्र शास्त्रमेव प्रमाणं भवितुमर्हति। साधुशब्दः प्रयोक्तव्यो नाऽसाधुशब्दः, साधुभिर्भाषितव्यः नासाधुभिरित्यत्रापि शास्त्रमेव प्रमाणं भवितुमर्हति। तत्र न प्रत्यक्षेण नानुमानेन, न च उपमानेन व्यवस्था कर्तुं शक्यते। अत्र आगमबलादेव अदृष्टधर्माधर्मव्यवस्था भवति। साध्वसाधुविषया धर्माऽधर्मव्यवथा भवति। साध्वसाधुविषया धर्माऽधर्मव्यवस्था शास्त्रं विना न सम्भवति। साध्वसाधुशब्दप्रयोगविषये व्याकरणागमः प्रमाणं भवति। अत्र शुष्कतर्केण किमपि वक्तुं न शक्यते। अतः व्याकरणे आगमस्य प्रामाण्यं स्वीक्रियते।

**धर्मविषयकं ज्ञानम् आगमादेव**

यागादिधर्मकार्यं महता सम्भारेण वेदेषु, श्रौतसूत्रादिषु च प्रोक्तं विद्यते। तेषां काम्यकर्मत्वात् प्रायशः सर्वत्रैव स्वर्गस्वाराज्यादिफलम् अपि तत्र सुस्पष्टम् अभिहितं वर्तते। न स्वर्गादयः शक्यन्ते प्रत्यक्षीकर्तुम्। अतिदूरे अतिसन्निहिते वा वर्तमानानां विषयाणां प्रत्यक्षीकरणं नैव प्रभवति। अत एव धर्मविषयकज्ञानेऽपि

इन्द्रियाणि असमर्थान्येव। अस्यां परिस्थितौ आगमाः अस्माकं पुरतः सन्तिष्ठन्ते। शिष्टप्रोक्तेन आगमेन सद्धर्मविषयकज्ञानप्राप्तौ भवान् समर्थो भवितमुर्हति। धर्मस्य मार्गः यः अनादिकालात् प्रवर्तमानोऽस्ति, तत् केवलेन तर्केण बाधितुं न शक्यते। धर्मस्य यः मार्ग ऋषिभिः अतीव सूक्ष्मचिन्तनेन व्यवस्थापितो विद्यते स शास्त्रविरूद्धशुष्कतर्केण खण्डयितुं न शक्तते। उदिते जुहोति, अनुदिते जुहोति, अध्युषिते जुहोति, सर्वमपि शाखाभेदेन कालभेदेन च शुद्धं भवति। अत्र शास्त्रमेव प्रमाणमावहति। अत एव उक्तम्-[1] धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥

उच्यते यत् खेदात् स्त्रीषु प्रवतिर्भवति, समानश्च खेदविगमो गम्यायां चागम्यायाम्।[2] तत्र शास्त्रेण धर्मनियमः क्रियते। इयं गम्या। इयम् अगम्या इति। अतः धर्मविषये न किमपि अन्यत् प्रमाणं भवति ऋते आगमात्-शास्त्राद् वा।

**अनुमानेन आगमस्य बाधोऽशक्यः**

न्यायशास्त्रदृष्टया अनुमानं प्रमाणेषु मुख्यं स्थानं धारयति। प्रत्यक्षसिद्धमप्यर्थम् अनुमानेन साधयितुमिच्छति तर्करसिकाः। यत्र अनुमानस्य प्रामाण्यं न सम्भवति तत्र आगमस्य प्रमाण्यं भवतु। किन्तु यत्र अनुमानेन कार्यसिद्धिर्भवेत्, तत्र आगमस्य बाधः स्यादिति न्यायशास्त्रविदामाशयः। तान् प्रति उच्यते यत् आगमस्य कथमपि बाधः भवितुम् न अर्हति। आगमोक्तधर्मस्य अविच्छन्नः मार्गः वर्तते। ते लोकप्रसिद्धाः सन्ति। अतः तर्केण तस्य बाधः न सम्भवति। अपितु सर्वत्र यदि अनुमानमेव आश्रयणीयं तदा महान् अनर्थः स्यात्। अनुमानप्रधानेन विनिपातो न दुर्दभः।

अनुमानं हि प्रत्यक्षपूर्वकव्याप्तिवलेन अनुमितौ कारणं भवति। प्रत्यक्षज्ञानं तत्कृता व्याप्तिश्च न सदा सन्देहविरहिता भवति। अतस्तन्मूलकम् अनुमानमपि नास्ति सर्वथा सन्देहविरहितम्। आगम-प्रमाणं तु भ्रम-प्रमाद-विप्रलिप्सादिदोषविरहितम्। अत एव तद्रम्यं ज्ञानम् अनुमानं न कदापि बाधितुमर्हति आगमप्रमाणम्। आगमप्रमाणम् अनुमानागम्यासु अवस्थासु द्रष्टुमशक्येषु देशेष्वपि कृतकार्यतां विधातुमर्हति। एवञ्च परमनिर्बलप्रत्यक्षानुमानादिभिः अतीव प्रबलम् आगमजन्यं ज्ञानं न कदापि क्षीणताम् उपयाति। आगमजन्यं शास्त्रजन्यं वा ज्ञानं सर्वतो बलवद् भवति। शास्त्रसिद्धं ज्ञानं लोकसिद्ध भवति। लोकसिद्धत्वात् आगमप्रमाणं कश्चन जनः अनुमानवलेन बाधितुं न शक्नोति।

**अनुमानेन पदार्थशक्तेः ज्ञानं दुर्लभम्**

एवमुपर्युक्तव्याख्यानेन ज्ञायते यत् धर्माधर्मविषये आगमस्यैव प्रामाण्यं भवति। तत्र अनुमानस्य प्रामाण्यं कथयमपि न संभवति। इदानीं प्रतिपाद्यते यत् लौकिकपदार्थानामपि अनुमानेन सर्वथा सिद्धिः भवितुं नार्हति। यतोहि अवस्थाभेदेन कालभेदेन देशभेदेन च पदार्थेषु शक्तिः भिद्यते। अवस्थाभेद शक्तिभेदो यथा जनः यौवने बलशाली भवति, वृद्धावस्थायां तु स एव निर्बलो भवति। यष्टिं विना चलितुमसमर्थः। देशभेदन पदार्थशक्तिभेदो यथा- गङ्गा यदा हिमालयसमीपे भवति। तदा अतिशीतला स्वच्छा च भवति। सैव यदा कानपुरमागच्छति तदा तत्र तादृशी शीतलता स्वच्छता वा न भवति। कालभेदे शक्तिभेदो यथा-ग्रीष्मे सूर्यः प्रचण्डोष्णतासम्पन्नः। स एव शीतकाले तादृशः न भवति। एवञ्च अवस्थादेशकालानां भेदात् शक्तयः पदार्थानां भिद्यन्ते। अतः केवलं शुष्कानुमानेन पदार्थानां स्वभावकल्पना शक्तिकल्पना वा कर्तुं न शक्यते। एवञ्च लौकिकपदार्थविषयेऽपि यदि अनुमानस्य शक्तिः क्षीणा भवति, तर्हि धर्माधर्मविषये तु अनुमानं कथं प्रमाणकोटिं प्राप्नुयादिति विज्ञेयम्। तथा च धर्मविषये आगम एव प्रमाणं भवितुमर्हति।

पदार्थशक्तयः सुसूक्ष्मा, प्रत्यक्षादिप्रमाणैः ज्ञातुमशक्याः। यासु पदार्थशक्तिषु अस्माकं परं भवति विनिश्चयः, ता अपि विविध-वस्तुसन्निधाने सति बाध्यन्ते। अतस्तासाम् इदमित्थंभावः कथमस्माभिः निश्चीयताम्। अनुमानं तु प्रत्यक्षम् अनुप्रचलितं पदार्थशक्तिं विज्ञापयति। यत् प्रत्यक्षात् अविशिष्टम्। अत एव विधिवस्तुसन्निधाने शक्तीनाम् अन्याथाभावः अनुमानेनापि नैव शक्यते विज्ञातुम्। अस्यां दशायाम् आगमप्रमाणमेव परिनिष्ठित-प्रमाणरूपेण अस्मत् सम्मुखम् उपयाति।

यतोहि अवस्थादेशकालानां भेदात् पदार्थानां शक्तयः भिन्नाः भवन्ति। अतः अनुमानेन केवलं पदार्थशक्तेः ज्ञानं कर्तुं न शक्यते। यदि एवं लौकिकपदार्थविषये भवति तदा अलौकिकधर्माधर्मविषये कथं गतिः स्यादनुमानस्येति चिन्तनीयम्।

अतः प्रतिपाद्यते यत्-[3]

**न चागामादृते धर्मस्तर्केण व्यवतिष्ठते।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्॥**

धर्मो यागादिः, 'धर्मः स्वनुष्ठितः पुंसाम्' इति दर्शनेन यागादिः धर्मः, धर्माधर्मव्यवस्था, कर्तव्याकर्तव्यव्यवस्था वा। एष धर्मः आगमम् वेदादिशास्त्रम् अपहाय केवलम् अनुमानसिद्धकरेण तर्केण नैव स्थितिं लभते। ऋषिवचसा ज्ञातुं शक्यते, किन्तु ऋषीणामपि यदेव संवर्तते अलौकिकं यथार्थं ज्ञानं तत् आगमबलेनैव प्राप्यते। आगमबलं विना तस्य याथार्थ्यम् अपि न शक्यते साधयितुम्। आगमोक्तधर्मानुष्ठानेन, तेषां चित्तं निर्मलम् अलौकिकज्ञानसम्पत्रं भवति, तेन तेषां सर्वविधं ज्ञानं जायते, ते प्रत्यक्षमिव सर्वं द्रष्टुं समर्थाः भवन्ति।

'यागः स्वर्गसाधनम्' इत्यादिवचनानि वैदिकेषु आप्तेषु यज्ञग्रन्थेषु उपलभ्यन्ते। स्वर्गस्तु न केनापि अस्मिन् जन्मनि प्रत्यक्षीकृतोऽस्ति। अत एव प्रत्यक्षानुमानबलेन स्वर्गसिद्धिः दुःशकैव। आगमप्रमाणेन स्वर्गादिकम् अवधार्य यजामानः यज्ञं कुरुते। सः पश्चात् स्वर्गं प्राप्नोत्यपि। एवम् आगम एव प्रेरयत्यस्मान् कुरुयागं, फलं पश्चाद् भविष्यति। मानवोऽल्पज्ञः, दुर्बलानि तस्य इन्द्रियाणि इति प्रतिपदम् अनुभूयते। एवञ्च उद्देश्यम् अदृष्ट्वापि आप्तजनेषु श्रद्धां विदधानः साधकः उद्देश्यं प्राप्नोत्यपि। ऋषीणाम् इन्द्रियाद्यनपेक्षं ज्ञानं प्रतिमाख्यधर्मविशेषजन्यं यथार्थंसम्पद्यते। अतस्तेषां वचनम् अनुमान्यमेव। यथा प्रोक्तम् -

**एवं यैः केवलं ज्ञानम् इन्द्रियाद्यनपेक्षिणः ।**
**सूक्ष्मातीतादिविषयं जीवस्थ-परिकल्पितम् ।**

अतः आगमप्रमाणं विना धर्मस्य रहस्यं ज्ञातुं न शक्यते। धर्माधर्मविषये आगमः यत् कथयति तदेवाचरणीयम् । धर्माधर्माणाम् इन्द्रियागोचरविषयाणां ज्ञानमागमं विना प्रत्यक्षेण तर्केण वा नैव सम्भवति। ऋषीणां तर्केण ज्ञानं प्राप्तं स्यादित्यपि न। ऋषीणामपि यथार्थं ज्ञानम् आगमपूर्वकमेव भवति। आगमप्रोक्तधर्मजनितं तेषां सर्वं ज्ञानं प्रत्यक्षमिव भवति। अतस्तत्र श्रद्धा विधेया। धर्माधर्मव्यवस्थायां ते प्रमाणं भवन्ति ।

तथा च उच्यते-[4]

**धर्मस्य चाव्यवच्छिन्ना पन्थानो ये व्यवस्थिताः।**
**न ताँल्लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते।।**

इह जगति धर्माः सनातनकालात् प्रवर्तमानाः सन्ति। कश्मिंश्चिदपि युगे तेषां विलोपः क्षयो वा नाभूत्। अत एव सर्वेषु कालेषु अव्यवच्छिन्ना धर्मा इति वक्तुं शक्यते। आगमप्रोक्तत्वात् प्रामाण्यमपि तेषां प्रसिद्धमेव। अत एव संवर्तते अमीषां सर्वदा लोकप्रसिद्धिः। अमीषां लोकप्रसिद्धिभाजां यदि कश्चन जनः केवलैः शुष्कतर्कैः बाधितुं प्रयतेत, तर्हि स सर्वथा निष्फल एव स्यात् । श्रुतिस्मृतिसिद्धानि वचांसि न कदापि सन्ति तर्कैः बाधितुं योग्यानि।

यथा 'द्यावाभूमी जनयन् देव एकः'[5] इत्यादिप्रमाणैः ईश्वरस्य जगत्सर्जकता प्रतिज्ञायते। एषा जगत् सर्जकता चित्यादिकं कर्त्रजन्यं शरीराजन्यत्वात् आकाशवत् इत्यनुमानतर्कजालैः न बाधितुं शक्यते। अनुमानस्य दुर्बलत्वात् अयोग्यत्वाच्च । वस्तुतस्तु शास्त्रे यस्य कर्मणः यादृशं फलं प्रोच्यते, तस्य तादृशमेव फलं भवति। फलमेतत् तर्केण नैव बाध्यते। उच्यते च-[6]

**तस्माद् यद् यादृशं कर्म यत्फलोत्पत्तिशक्तिकम् ।**
**शास्त्रेण गम्यते तस्य तादृशस्यैव तत्फलम्।।**

अर्थात् आधर्मस्य व्यवस्थितान् अव्यवच्छिन्नान् मार्गान् कोऽपि जनः शुष्केण तर्केण वाधितुं नैव क्षमते। तेन सर्वथा अनर्थः स्यात्। शुष्कतर्केण यत् सिद्धं भवति तान् लोकाः न स्वीकुर्वन्ति। धर्माधर्मयोः व्यवस्था लोकप्रसिद्धा भवति। तत्र अगमातिरिक्तस्य प्रामाण्यं न भवति । शास्त्रं यत् कथयति तदेव प्रमाणं भवति। कथं करणीयम्, तत्र का युक्ति, कः तर्कः इत्येवं न चिन्त्यते।

**उपसंहारः**

यतो हि प्रबल आगमः, अत एव कश्चित् लोके तर्क प्रसिद्धं प्रसाधयति - इत्येतावन्मात्रेण आगमो नैव बाधितो भवति। अपितु लोकं, परलोकं च जानान्तः ऋषयः धर्मस्य सनातनकालात् प्रचलितं मार्गमेवाश्रयन्ति। तत्रैव ते साफल्यं लभन्ते। सर्वेषामपि लौकिकानां पदार्थानाम् अवस्थादेशकालभेदात् शक्तिः भिद्यते। एतस्यां स्थितौ एकस्याम् अवस्थायां दृष्टायाः व्याप्तेराधारेण सर्वत्रानुमानप्रसारणं न युक्तम्। अत एव स्पष्टमेतद् यत् तथाभूतेन अनुमानेन सर्वस्मिन् देशे काले च परिवर्तितानां पदार्थानां याथाय नैव कदापि ज्ञातुं शक्यते । इदमप्यस्ति अनुमानदौर्बल्ये कारणम् विविधाम् अर्थक्रियां प्रति या याः द्रव्यस्य शक्तयः परिज्ञाताः सन्ति, ता अपि विशिष्टद्रव्यसम्बन्धे प्रतिबध्यन्ते। कोऽपि निपुणतमोऽपि नावधारयितुं क्षमते, यन्मया सर्वेऽपि विशिष्टद्रव्यसम्बन्धाः परिज्ञाताः खलु। अस्य अवधारणस्य अभावे किमप्यनुमानं याथार्थ्यम् अत्येति ।

अनुमानाधारितः निष्कर्षः, अनुमितिर्वा सदा नैकरूपतां धारयति। केचन शब्दमाकाशगुणं, केचित्तु पृथिव्यादिषु वर्तमानं शब्दं गुणं निर्धारयन्ति। एवम् अनुमितीनां नैकरूप्ये सति अनुमितेरिद-मित्थंभावः कथं स्यात्। अतोऽपि आगमस्य सबलत्वं सिद्धं भवति। एषा सर्वाऽपि शास्त्राधीना व्यवस्था आगमप्रोक्ता विद्यते। आमागश्च प्रतियुगम् अविच्छिन्नं संसरति । एवञ्च सर्वदैव प्रवर्तमानः नित्य आगामः अनित्यैः हेतुवादैः न कदापि बाध्यते। अपि च यथा केवलं हस्तस्पर्शविधिना उच्चावचभूमिं ज्ञातुमुद्यतस्य अन्धस्य विनिपातो भवत्येव केवलम्, तथैव केवलं सीमितदेशकालविशिष्टव्याप्तिबलेन अनुमानं कुर्वतः पुरुषस्य विनिपातविषये नास्ति कश्चन सन्देहः। अत एव सर्वेऽपि शिष्टाः नित्यम् आगमम् आगमाधीनां स्मृतिं च आश्रित्य शब्दानुशासनं नाम शास्त्रं प्रणीतवन्तः।

**सन्दर्भग्रन्थसूची**

*सुब्रह्मण्य अय्यर। (1980)। वाक्यपदीयम्। वाराणसी: सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः।*

*शास्त्री गजानन्दः (1978)। मीमांसाश्लोकवार्तिकम्। वाराणसी: चौखम्बा संस्कृत सीरीज़ कार्यालय।*

*धर्मराजाध्वरीन्द्रः। (1989)। वेदान्तपरिभाषा। वाराणसी: चौखम्बा विद्याभवनम्।*

*वल्लभाचार्य कृष्ण। (1966)। मुक्तावली। वाराणसी: चौखम्बा संस्कृत सीरीज़ कार्यालय।*

*शर्मा सभापति, शर्मा बालकृष्ण (1966)। वैयाकरणसिद्धान्तकौमुदी। वाराणसी: मोतीलाल बनारसीदास।*

**पाद टिप्पणी**

[1] मनुस्मृतिः-2.13

[2] महाभाष्यम्- पस्पशाह्निकम्

[3] वाक्यपदीयम्- 1.30

[4] वाक्यपदीयम्- 1.31

[5] श्वेताश्वतरोपनिषद्-3.3

[6] मीमांसाश्लोकवार्तिकम्- 256